## एकादशः पाठः

# संसर्गजाः दोषगुणाः

**संस्कृतसाहित्ये कथासाहित्यं विपुलं वर्तते। तत्र पञ्चतन्त्रम्, कथासरित्सागरः, वेतालपञ्चविंशतिः, विक्रमादित्यकथाः, वृहत्कथामञ्जरी, हितोपदेशः इत्यादयः ग्रन्थाः प्रसिद्धाः सन्ति। सत्सङ्गतिः कथं व्यवहारे परिवर्तनं करोति इति कथामाध्यमेन अत्र प्रस्तुतम्।**

कश्चित् एकः महान् तपस्वी ऋषिः आसीत्। सः लोककल्याणार्थम् अहर्निशं भूतले भ्रमति स्म। एकदा सः परिभ्रमन् एकं ग्रामम् अगच्छत्। ग्रामस्य एकस्मिन् गृहे एकः शुकः पालितः आसीत्। सः शुकः ऋषिं दृष्ट्वा ''मारयतु कुट्टयतु'' इति वारं वारम् उच्चैः उक्तवान्। अनन्तरं सः ऋषिः अपरं स्थानम् अगच्छत् तत्रापि एकस्मिन् गृहे शुकः पालितः आसीत्। सः ऋषिं दृष्ट्वा ''सीताराम-सीताराम'' इति उक्तवान्। एवं शुकयोः भिन्नव्यवहारं दृष्ट्वा ऋषिः आश्चर्यसागरे निमग्न अभवत्। सः चिन्तयति यद्यपि शुकौ समानजातीयौ तथापि आचरणं पृथक्-पृथक् दृश्यते, किं कारणम् ? तत्र पार्श्वस्थं शुकं ऋषिः कारणं पृष्टवान्। तदा शुकः उत्तरति यत् ऋषिवर्य! शृणोतु -

**अहं मुनीनां वचनं शृणोमि**
**गवाशनानां स शृणोति वाक्यम्।**
**न चास्य दोषो न च मद्गुणो वा**
**संसर्गजाः दोषगुणाः भवन्ति॥**

महात्मन्! तत्र व्याधानां ग्रामः अस्ति। सः शुकः व्याधस्य गृहे निवसति। व्याधाः अहर्निशं मारणं कर्तनं हिंसात्मिकां वार्तां च कुर्वन्ति, सोऽपि तानि कार्याणि पश्यति तेषां वार्तालापं च शृणोति। अतः ''मारयतु कुट्टयतु'' इति वदति। अहं तु मुनेः आश्रमे निवसामि। तत्र मुनयः भगवन्नामसङ्कीर्तनं पूजां च कुर्वन्ति। अहं सर्वं खलु पश्यामि आचरामि च। अतः अहं ''सीताराम-सीताराम'' इति वदामि। अतः तस्य शुकस्य न कोऽपि दोषः न मम गुणश्च यतोहि दोषाः गुणाः च संसर्ग-प्रभावात् उत्पन्नाः भवन्ति।

पूर्वं महर्षिः वाल्मीकिः सप्तर्षीणां सत्सङ्गप्रभावात् महान् तपस्वी जातः अनन्तरं रामायणमहाकाव्यं विरचितवान्। महद्भिः जनैः प्रतिष्ठितो भूत्वा अश्मा अपि देवत्वं प्राप्नोति। पुष्पाणां संसर्गात् पिपीलिका अपि भगवतः शिवस्य शीर्षस्थितं चन्द्रबिम्बं चुम्बति। अतः सज्जनानां सङ्गः करणीयः दुर्जनानां सङ्गः परिहर्तव्यश्च। कथितमपि -

**कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।**
**अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः॥**

### शब्दार्थः -

| | | |
|---|---|---|
| लोककल्याणार्थम् | - | संसार के कल्याण के लिए |
| संसर्गजाः | - | सङ्ग रहने से उत्पन्न होने वाले |
| अहर्निशम् | - | रातदिन |
| भूतले | - | धरती पर |
| शुकः | - | तोता |

| | | |
|---|---|---|
| गवाशनानाम् | – | गोभक्षियों के |
| मारयतु कुट्टयतु | – | मारो–कूटो |
| कीटः | – | कीड़ा |
| पिपीलिका | – | चींटी |
| सत्सङ्गः | – | सज्जनों का साथ |
| अश्मा | – | पत्थर |

## अभ्यासः

### ( 1 ) एकपदेन उत्तरं लिखत –

(क) ऋषिः किमर्थं भ्रमति स्म ?

(ख) प्रथमः शुकः किं वदति स्म ?

(ग) अपरः शुकः किं वदति स्म ?

(घ) महर्षिः वाल्मीकिः किं रचितवान् ?

(ङ) केषां सङ्गात् पिपीलिका चन्द्रबिम्बं चुम्बति ?

### ( 2 ) एकवाक्येन उत्तरं लिखत –

(क) ऋषिः आश्चर्यसागरे किमर्थं निमग्नोऽभवत्?

(ख) महर्षिः वाल्मीकिः कथं तपस्वी जातः ?

(ग) अश्मा कथं देवत्वं प्राप्नोति ?

(घ) केषां सङ्गः करणीयः ?

### ( 3 ) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) द्वितीयः शुकः ऋषिं किम् उक्तवान् ?

(ख) किमर्थं सत्सङ्गः करणीयः ?

(ग) दोषाः गुणाश्च कथम् उत्पद्यन्ते ?

### ( 4 ) यथायोग्यं योजयत –

| | ( अ ) | ( आ ) |
|---|---|---|
| (क) | मुनिशुकः | सत्सङ्गः |
| (ख) | दोषगुणाः | लोककल्याणार्थम् |
| (ग) | व्याधशुकः | सीतारामः |
| (घ) | आचरणीयः | संसर्गजाः |
| (ङ) | ऋषेः भ्रमणम् | मारयतु कुट्टयतु |

## (5) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं 'न' इति लिखत –

| | | |
|---|---|---|
| **यथा –** | **संसर्गात् स्वभावपरिवर्तनं भवति।** | **आम्** |
| | **दुर्जनानां सङ्गः करणीयः।** | **न** |
| (क) | द्वितीयः शुकः ''सीताराम'' इति वदति स्म। | |
| (ख) | ऋषिः लोककल्याणार्थं न भ्रमति स्म। | |
| (ग) | दुर्जनानां सङ्गात् लाभः भवति। | |
| (घ) | सज्जनानां सङ्गतिः करणीया। | |
| (ङ) | पिपीलिका सत्सङ्गात् भगवतः शिवस्य शीर्षस्थितं चन्द्रबिम्बं न चुम्बति। | |

## (6) निम्नलिखितक्रियापदानां भूतकालिकक्रियापदानि लिखत –

### उदाहरणम्

**वदति – अवदत्**

भ्रमति – ...........।

शृणोति – ...........।

गच्छति – ...........।

चिन्तयति – ...........।

भवति – ...........।

करोति – ...........।

## (7) निम्नलिखितानां मूलशब्दं विभक्तिं वचनं च लिखत –

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| **यथा– ग्रामम्** | **ग्राम** | **द्वितीया** | **एकवचनम्** |
| सज्जनानाम् | | | |
| पुष्पाणाम् | | | |
| शुकयोः | | | |
| मुनीनाम् | | | |
| गवाशनानाम् | | | |
| जनैः | | | |
| संसर्गात् | | | |
| शिवस्य | | | |

**( ८ ) निम्नलिखितानां क्रियापदानां द्विवचनं बहुवचनं च लिखत –**

| यथा | गच्छति | गच्छतः | गच्छन्ति |
|---|---|---|---|
| (क) | अस्ति | | |
| (ख ) | याति | | |
| (ग) | आरोहति | | |
| (घ ) | चुम्बति | | |
| (ङ) | पश्यति | | |
| (च) | मारयति | | |
| (छ ) | निवसति | | |
| (ज ) | लिखति | | |

**( 9 ) निम्नलिखितानां धातुं प्रत्ययं च पृथक् कृत्वा लिखत –**

**उदाहरणं यथा –**

**दृष्ट्वा –　　　　दृश् + क्त्वा।**

श्रुत्वा –　　　　. . . . . . . . . . . . . . . . . . . . .।

पठित्वा –　　　　. . . . . . . . . . . . . . . . . . . . .।

पालितः –　　　　. . . . . . . . . . . . . . . . . . . . .।

करणीयम् –　　　　. . . . . . . . . . . . . . . . . . . . .।

विरचितवान् –　　　　. . . . . . . . . . . . . . . . . . . . .।

उक्तवान् –　　　　. . . . . . . . . . . . . . . . . . . . .।

**( 10 ) निम्नलिखिताव्ययानां वाक्यप्रयोगं कुरुत –**

**उदाहरणम् –**

**एकदा –　　एकदा सः ग्रामम् अगच्छत्।**

च –　　　　. . . . . . . . . . . . . . . . . . .।

तत्र –　　　　. . . . . . . . . . . . . . . . . . .।

अपि –　　　　. . . . . . . . . . . . . . . . . . .।

उच्चैः–　　　　. . . . . . . . . . . . . . . . . . .।

इति –　　　　. . . . . . . . . . . . . . . . . . .।

तदा –　　　　. . . . . . . . . . . . . . . . . . .।

**योग्यताविस्तारः –**

- संसर्गप्रभावात् व्यवहारपरिवर्तितानां जनानां नामानि अन्वेषयत लिखत च।
- ‘‘सत्सङ्गतिः’’ इति विषये संक्षिप्तं निबन्धं संस्कृतभाषायां लिखत।

❖ ❖ ❖